No. २४५८ क

Title प्रत्यङ्गिरा पञ्चाङ्गम्.

Author

Extent ६५ पत्र Age सं. १९४५.

Subject तन्त्र

नं० ५६०

सं० १६४

ॐश्रीगुरुपादुकाभ्यो नमः

ॐश्रीगणेशाय नमः ॐश्रीप्रत्यंगिराभगवत्यै नमः

प॰ १

ॐ मेरुपृष्ठे सुखासीनं भैरवं परमेश्वरं प्रसन्नव
दनं देवं नागयज्ञोपवीतिनं १ गजचर्मपरीधा
नं भूतिभूषणविग्रहं कपालमालाभरणं गंगावी
चिरवाकुलम् २ चंद्रार्धांचितमूर्धानं सर्पकंक
णनूपुरं खट्वांगशूलपाशासि विभूषितकरांबु

जं ३ वामांकस्थितगौरीकंदेवगंधर्वसेवितं य
क्षेन्द्रकिन्नरस्तुतं ब्रह्माच्युतनमस्कृतं ४ प्रहसंतं
जपंतंच ध्यायंतंचमुहुर्मुहुः स्मितपूर्वंप्रणम्यादौ
बद्धांजलिपुटाननः ५ उत्थायपार्वतीदेवी भग
वंतमभाषत श्रीदेव्युवाच भगवंस्त्वंपरोदेव सर्व
लोकप्रभुरीश्वरः ६ त्रिगुणात्मागुणातीत श्चिन्त्य

पट २ रूपोनिरंजनः सकलोनिष्कलोदेवः सत्तारूपोमहेश्वरः
७ त्वंकिंजपसिदेवेशा ममायुविदितंद्वयत् तत्समा
चक्ष्वसकलं यद्यहंतववल्लभा ८ श्रीभैरवउवाच
एतद्रहस्यतमंलोके नकस्यकथितंमया तथापितां
विदेवेशि भक्त्यागुह्यंवदाम्यहं ९ यादेवीलोकमा
तेति महामाहेश्वरीशिवा प्रत्यंगिरेतिविख्याता सा

२८

षट्त्रिंशतिवर्णिका ९ त्वज्ञानेसकलंविश्वं बिभ्रती
चनतेंविका ज्ञानेसंहारकर्त्रीच संहरिष्यतितामसी
११ गुणत्रयमयीविद्या महादारिद्र्यहारिणी तस्याःपं
चांगमीशानि पठाम्यहमहर्निशं १२ जपविद्यार्चनं
तस्यावर्मनामसहस्रकं स्तवोमंत्रमयोदेवि पंचां
गमिदमुत्तमम् १३ प्रभावादस्यधीशानः सृष्टिस्थि

पट॰ तिलयात्मकः श्रीदेव्युवाच भगवन्देवदेवेशानिःशेष
३ करुणाकर देव्याश्छत्रपरीरायाश्च पंचांगवक्तुमर्हसि
३ श्रीभैरवउवाच पटलंपद्धतिंचैव वर्मनामसहस्रकं
स्तोत्रंमंत्रमयंदेविवक्ष्येलोकहितेछया अत्रादौपट
लंदिव्यं मूलमंत्रमयंपरं सर्वतंत्रमंत्रसहितं प्रयोग
सहितंस्फुटं अथमंत्रोद्धारः प्रणवंवाग्भवंमायाल
२५

श्री
ल्मीः प्रत्यंगिरेतिच ममरक्षहृदयंदेवि मूमशत्रून्नजः
परम् भक्षहंहंसतारंच स्वाहांतोमंत्रमुत्तमः प्रथा
विद्यामयाख्याता परमार्थप्रदायिनी भोगदास्तव
दादेवी राज्यदायनदातथा सिद्धिदामोक्षदाविद्या
परंसाम्राज्यदायिनी गुरुपादप्रसादेन श्रीविद्याय
दिलभ्यते विनागुरूपदेशेन सानसिद्ध्यतिभारते

पट॰
४

नास्यांतरायोनक्लेशो नशौचनियमोपिवा साक्षात्सि
द्धिप्रदोदेवि मंत्रोयंभोगमोक्षदः वर्णलक्षंपुरश्चर्या
तदर्धंवामहेश्वरि पक्षलक्षावधिंज्ञेया ज्ञातोऽन्यूनंक
दाचन जपाद्दशांशतोहोम स्तद्दशांशेनतर्पणं मा
र्जनंतद्दशांशेन तद्दशांशेनभोजनम् वटेरण्येश्मशा
नेच शून्यागारेचतन्मध्ये अर्धरात्रेचमध्याह्ने पुरश्च


रणामारभेत् जीवहीनोयथादेहः सर्वकर्मसुन
क्षमः पुरश्चरणहीनोयो नमंत्रःफलदायकः मं
त्रमुत्कीलयेदादौ मंत्रंसंजीवयेत्ततः नौटिल्यंत
चरेत्पश्चा ततःशापहरींजपेत् सिद्धिमंत्रंजपेछु
द्धं ततःसंपुटितंचरेत् क्रमेनानेनदेवेशि श्रीवि
द्यायोजपेन्मुवि ससायकोभवेल्लोके भोगीसायु

पटः
५

ज्यमाप्नुयात् मंत्रस्यास्यमुनिःप्रोक्तो महाभैरवएवच अ
नुष्टुपछंदश्चप्रोक्तः श्रीमत्प्रत्यंगिरेतिच देवतास्यपराबी
जं शक्तिःस्वाहाचकीलकं भोगापवर्गसिद्ध्यर्थं विनियो
गइतिस्मृतः ध्यानमस्याःप्रवक्ष्यामि सर्वतंत्रेषुगोपि
तं श्यामांबरामुक्तकचांचनग्नांवि ध्येयासचर्मासिक
राहिभूषणा दंष्ट्रोग्रवक्त्रायसिनाहितान्वया प्रत्यंगि

शत्रुजित संहिता

राशंकरतेजसेरिता यंत्रोद्धारं प्रवक्ष्यामि सर्वसिद्धि
प्रवर्त्तकं सर्वसंमोहनंचक्रं सर्वाशापरिपूरकं
बिंदुत्रिकोणवसुकोणकनागयुक्तं वृत्ताष्टपत्रक
षटंचत्रिवृत्तयुक्तम् भूगेहलक्ष्मविचितं सकलेष्ट
सिद्धं प्रत्यंगिराभगवतीवसतेसदास्मिन् लयांगम
स्यवक्ष्यामि यंत्रराजस्यपार्वति येनश्रवणमात्रेण



पट· कोटिपूजाफलंलभेत् इंद्राद्यालोकपालाश्च ब्रह्मानंतांकि
९ नाःप्रिये वज्रादिहेतिसंयुक्ताः पूज्याभूगेहमंडले वाय
6 व्येशानपर्यंतं दिव्यसिद्धौचमानवान् गुरून्संपूजयेद्दे
वि पंक्तित्रितयमध्यगान् ब्रह्म्याद्यामातरःपूज्या भैर
वाष्टकसंयुताः वामावर्तक्रमेणैव रक्तपुष्पैर्विशेषतः
स्तंभिनीमोहिनीचैव क्षोभिणीद्राविणीतथा जृंभिणी

भ्रामणीरौद्री तथासंहारिणीतिच वह्निकोणेपरापूज्या
महाचीनक्रमेच्छुभिः वामावर्त्तेनदेवेशि परमार्थप्रदा
सदा कालीचभद्रकालीच नित्याकालीत्रिकोणगाः प्र
नाःसंपूजनीयास्तु शिवायावामभागतः बिंदौमाहेश्व
रीदेवी देवीप्रत्यंगिरांबिका शिवंचभैरवंनाम पूजये
द्विंडमंडले देवीरत्नमयीपात्रे सौवर्णेपूजयेत्सुधीः

पट. ८

लयांगमेतदाख्यातं सर्वसिद्धिप्रदं शिवे प्रयोगानष्टवक्ष्येहं
शृणुष्वावहिताप्रिये स्तंभनं मोहनं चैव मारणाकर्षणे ततः
वशीकारोच्चाटनाख्यं शांतिकं पौष्टिकं ततः एतेषां साधनं व
क्ष्ये मंत्रसिद्धिप्रवर्तकं येन श्रवणमात्रेण मंत्रः कल्पद्रुमो
भवेत् रवौ स्नात्वा जपेन्मूलं वटमूले महेश्वरि अयुतं तद्द
शांशेन हुनेदाज्यं सितां शाटीम् गोधूममधुनालाजा स्तंभ
गोधूमी

येह्वादितांगतीः जलसूर्येंडवानानां गतिरेषांवक्ष्यते तांध्यते
अश्वत्थस्यतलेजप्त्वा मूलविद्यांयथाविधिः अयुतंतद्दशां
शेन जुहुयात्सर्पिरेणुजं मृग मांसंकणापाटीमिश्रं मोहनंज
गतांभवेत् भौमे कुजेवाशनिवारेपि अर्केविष्टिंडसंगमे गत्वा
श्मशानेदेवेशि नत्वादिभूतभैरवान् चितांसंपूज्यवीरे
शो जपेदयुतसंख्यया चितायौजुहुयादाज्यं गुडयुग्मश

पट॰
८
४

तावरीः वेडालकेशानखर दंतमिश्राश्चसायकः तर्पयेत्तद्दशां
शेन भोजयेत्पात्रपूर्वकं शत्रुर्मत्तसमानोपि स्तम्भमायाति
नान्यथा करीरमूलेगिरिजे जपेन्मूलंशिवेयुतं हुनेदाज्यं
वचांशुंठी मोहयत्यबलादलं मेनकापीनवक्षोजा स्वस्या
प्याकर्षिताभवेत् (देतसी) वानीरमूलेदेवेशि जपेदयुतसंख्यया
हुनेदाज्यं (मधु) युतं नागवल्लीदलांकितं भूबिंबंतर्पयेद्देवि

दशांशेनैवसाधकः शक्रोपिदासतांयाति किंपुनःक्षुद्र

मानुषः॥ क्रूरदैत्क्रूरवेलायां जपेत्प्रेतालयेमंत्रं अयुतंत्व

चितावह्न्योद्भवेनत्सार्पिकणोघ्रणान् जातीफलंमेषपलं

त्वररोमाणिपार्वति रिपूणांसहस्रादेवि भवेदुच्चाटनं

परं नदीकूलेजपेन्मंत्रं अयुतंसाधकोत्तमः तद्दशांश

हुनेदाज्यं समरहीकंसपायसं कनकंनागरंराज्ञो तर्पये

पट॰ तद्दशांशतः श्रुतिवृष्टेरनावृष्टे मोरीभीतेर्महेश्वरि राजभी
५ तेर्महाव्याघ्रा त्सयः शांतिः प्रजायते महापर्वदिने देवि य
९ त्रतत्रजपेन्मतं प्रयुतं तद्दशांशेन जुहुयादाज्यपायसं
श्रीलं सिंधुरमिश्रं च सपलं सलवंगकं पक्वमांसं सारमीनं
साम्लं च सकुलुत्थकं मासवं शुक्रसहितं रजोवत्युवरान्वि
तं हुत्वा च तर्पयित्वा च भोजयित्वा च साधकान् पितृणां

देवतानांच ऋषीनांऊलिनांप्रिये दिव्यकल्याग्रुतंदेवि
महापुष्टिःप्रजायते सर्वथासर्वदानित्यं महाविद्यांज
पेत्सुधीः दशांशंहोमयेत्तत्र तर्पयेत्तद्दशांशतः भो
जयेत्तद्दशांशेन मंत्रीकिंकिंनसाधयेत् मूर्खोवाग्मी
शांतांयाति निर्धनोधनवान्भवेत् महादारिद्र्ययुक्तोपि
भवेद्वैश्रवणोपमः इहलोकेभवेद्भोगी परत्रत्रिदिवे

पट० व्रजेत् इतीदं मंत्रसर्वस्वं प्रत्यंगिरारहस्यकं पटलंगु
१० ह्यमीशानि गोपनीयं स्वयोनिवत् इति श्रीप्रत्यंगिरा
1.0 रहस्ये रुद्रयामले तंत्रे पंचांगखंडे प्रत्यंगिरापटले स
माप्तम् ॥

श्रीमुकुन्दसाहि बक्षोपितं श्रीप्रत्यंगि
रापटलं श्रीरामसिंह जि बत काश्मीरजंबूदेशाभूपति
हितार्थं ॥

श्रीः। ॐ अथ पूजापद्धतिं वक्ष्ये प्रत्यभिज्ञाईनाथुतां। गणपतसमवीणोप्यं सकलागमान्
स्थितम्॥ प्रातः कृत्यं समाप्याथ योदेवीभक्तितोर्चयेत्। नस्य पूजानुविफला प्रोक्ता हीनाद
याक्रिया॥ तत्रादौ॥

पू: ॐ श्रीगणेशाय नमः ॐ ब्राह्मे मुहूर्ते शयनतलादुत्थाय
१ करचरणौ प्रक्षाल्य निजासने समुपविश्य निजशिरसि
श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकान्तर्गतचं
द्रमंडलोपरिस्थगुरुं शुक्लवर्णं शुक्लालंकारभूषितं ज्ञा
नानंदमुदितमानसं सच्चिदानंदविग्रहं चतुर्भुजं ज्ञानमु
द्रापुस्तकवराभयकरं त्रिनयनं प्रसन्नवदने क्षणं सर्व

देवं वामांगे वामहस्तधृतरक्तकमलया रक्तवसनाभरण
यास्वप्रियया दत्तभुजेनालिंगितं परमशिवस्वरूपं ध्या
त्वा तच्चरणकमलविगलदमृतधारयास्वात्मानं प्लु
तं विभाव्य मानसोपचारैराराध्य ॐ ऐं ह्रीं श्रीं हसखफ्रें ह
सक्षमलवरयूं सहखफ्रें सहक्षमलवरयीं स्हौं स्हौः
[illegible] [illegible]
श्रीमच्छ्रीअमुकानन्दनाथश्रीपादुकां श्रीमदमुकाम्बाश्री
ॐ ऐं ह्रीं श्रीं लं पृथिव्यात्मकं गन्धं श्रीगुरुभ्यः समर्पयामि नमः, ॐ हं आकाशात्मकं पुष्पं, ॐ यं वाय्वात्मकं धू
पं ॐ रं वह्न्यात्मकं दीपं, ॐ वं अमृतात्मकं नैवेद्यं, ॐ सं सर्वात्मकं फलमूलताम्बूलादिकं ॥ इति मान
सोपचारैः संपूज्य श्रीगुरुपादुकां विमृश्य यथा ॥

पू॰ पादुकांपूजयामिनमः तर्पयामिनमः इतिदशधाविमृश्य
२ दंडप्रणामंमनसाकुर्यात् तत्रप्रणाममंत्रायथा ॐनमा
2 मिसद्गुरुंशांतं प्रत्यक्षंशिवरूपिणं शिरसायोगपीठ
स्थं मुक्तिकामार्थसिद्धये १ श्रीगुरुंपरमानंदं वंदाम्या
नंदविग्रहं यस्यसान्निध्यमात्रेण चिदानंदायतेपरं २
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलि

तंयेन तस्मैश्रीगुरवेनमः ३ अखंडमंडलाकारं व्याप्तं
येनचराचरं तत्पदंदर्शितंयेन तस्मैश्रीगुरवेनमः ४
गुरुर्ब्रह्मागुरुर्विष्णु गुरुःसाक्षान्महेश्वरः गुरुरेवजग
त्सर्वं तस्मैश्रीगुरवेनमः इतिप्रणाममंत्रान्पठित्वान्यां
स्तुपठेत् नमस्तेनाथभगवन् शिवायगुरुरूपिणे वि
द्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह नवायनवरूपा

पू॰ य परमार्थैकरूपिणे सर्वज्ञानतमोभेद भानवेचिद्घ
३ नायते स्वतंत्रायदयाक्लृप्त विग्रहायपरात्मने परतंत्रा
3 यभक्तानां भव्यानांभव्यरूपिणे ज्ञानिनांज्ञानरूपाय
प्रकाशायप्रकाशिनां विवेकिनांविवेकाय विमर्शाय
विमर्शिनां पुरस्तात्पार्श्वयोःपृष्ठे नमस्कुर्यामुपर्यधः
सदामच्चित्तरूपेण विधेहिभवदासनं इतियस्तंत्र

णम्य स्वप्रसन्नं विभाव्य मनसा तदाज्ञां गृहीत्वा मूलाधा
रे स्वर्णवर्णचतुर्दलकमलकर्णिकांतर्गतत्रिकोणव
र्त्तिनीं दिनकरसहस्रभास्वरां विद्युत्कोटिसन्निभां सक
लमंत्रमातरं सर्वप्राणिजीवां त्रियामथा मानं सर्पाका
राम् ऊर्ध्वमुखीं सार्धत्रिवलयां बिसतंतुतनीयसीं सुज्ञां वि
भाव्य गुरूपदिष्टनिजसहजनादेन प्रबोधयित्वा तत्र

गाटपीनापरी परांश
त्तिं ॐ ३/लिनी मुग्

पूः ४

ऐं ह्रीं श्रीं
ॐ वं नमः शं नमः षं नमः सं नमः इति पत्रेषु मध्ये मूलेन च
प्रागवामदक्षिणेन संपूज्य हंसः इति मंत्रेण सर्वत्रोप्याप्प
ततो विद्रुमवर्णे षट्दलकमले स्वाधिष्ठाने लिंगमूले तानी
त्वा तत्र बं नमः भं नमः मं नमः यं नमः रं नमः लं नमः इ
ति पत्रेषु मध्ये मूलेन च संपूज्य ततो मणिपूरके नाभौ नील
वर्णे दशदलकमले तानीत्वा तत्र डं नमः ढं नमः णं नमः

तंनमः थंनमः दंनमः धंनमः नंनमः पंनमः फंन
मः इतिपत्रेषु मध्येमूलेनचसंपूज्य ततोवक्षस्थनाह
ते पिंगलवर्णे द्वादशाकमलेतांनीत्वा तत्र कंनमः
खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जं
नमः झंनमः ञंनमः टंनमः ठंनमः इतिपत्रेषुम
ध्येमूलेनचसंपूज्य ततोविशुद्धौकंठेधूम्रवर्णेषोड

पू॰ ५

शादलकमलेतांनीत्वा तत्र अंनमः आंनमः इंनमः ईंनमः
उंनमः ऊंनमः ऋंनमः ॠंनमः लृंनमः ॡंनमः एंनमः
ऐंनमः ओंनमः औंनमः अंनमः अःनमः इतिपत्रेषुमध्ये
मूलेनचसंपूज्य ततोभ्रूमध्येआज्ञाचक्रे विशुद्धर्णोद्विदल
कमलेतांनीत्वा तत्र हंनमः क्षंनमः इतिपत्रयोर्मध्येमूले
नचसंपूज्य ततः सहस्रदलकमलकर्णिकांतर्गतबिंदु

रूपंतेजोमयपरमशिवेनसहैकतांनीत्वा तेनामृतेन
ततःस्रवतातांसंतर्प्य तत्र नादश्रवणानन्तरंगुरुहृत्तल
यंविभाव्य पुनरपितथैवाज्ञाचक्रादिक्रमेणतेषुतेषुक
मलेषुतैस्तैरत्नैःसंपूज्य अवरोहे सोहमितिमंत्रेणक
मलात्कमलमवरुह्य पुनरपिमूलाधारेस्वस्थानेस्थाप
येदित्यारोहावरोहक्रमेणपरांदेवींकुंडलिनींध्यात्वा

पू: ९

प्राणायामऋष्यादिकरषडंगन्यासध्यानानिवक्ष्यमाणक्रमेण
कृत्वा यथाशक्तिजपंविधाय पुनरपिप्राणायामादिनाजपंस
मर्प्य नित्यकृत्यंसमर्पयेत् प्रातःप्रभृतिसायांतं सायादिप्रा
तरंततः यत्करोमिजगद्योने तदस्तुतवपूजनं इतिसमर्प्य
स्वकार्यानुष्ठानाय त्रैलोक्यचैतन्यमयेसुरेशि प्रत्यंगिरेत्वच्च
रणाज्ञयैव प्रातःसमुत्थायतवप्रियार्थं संसारयात्रामनु

वर्त्तयिष्ये संसारयात्रामनुवर्त्तमानं त्वदाज्ञयाश्रीपरमेशि
देवि स्पर्धासूतिरस्कारकलिप्रमाद भयानिमांमाभिभवंतु
मातः जानामिधर्मंनचमेप्रवृत्तिः जानाम्यधर्मंनचमेनि
वृत्तिः त्वयाहृषीकेशिहृदिस्थयाहं यथानियुक्तोस्मित
थाचरामि इतिदेव्याज्ञांप्रार्थ्य॥ जपाजपंसहजसिद्धंतत्तद्देव
ताभ्यःसंकल्प्यसमर्पयेत् ॐअद्यपूर्वेद्युरहोरात्राचरित

पू॰ ८

गुह्यासनितःश्वासात्मकं षट् शतनाधिकमेकविंशतिसहस्रसंख्याकमजपाजपमहं करिष्ये इति संकल्प्य समर्पयेत् तद्यथा ॐ ऐं ह्रीं श्रीं मूलाधारचक्रस्थाय गणपतये अजपाजपानां षट् शतं समर्पयामि नमः ॐ ऐं ह्रीं श्रीं स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अजपाजपानां षट् सहस्राणि समर्पयामि नमः ॐ ऐं ह्रीं श्रीं मणिपूरकचक्रस्थाय विष्णवे अजपाजपानां षट्

सहस्राणिसमर्पयामिनमः ॐऐंह्रींश्रींअनाहतचक्र
स्थायरुद्रायाजपाजपानांषट्सहस्राणिसमर्पयामिन
मः ॐऐंह्रींश्रींविशुद्धचक्रस्थायजीवात्मनेअजपाजपा
नांसहस्रंसमर्पयामिनमः ॐऐंह्रींश्रींआज्ञाचक्रस्थाय
परमात्मनेअजपाजपानांसहस्रंसमर्पयामिनमः ॐ
ऐंह्रींश्रींसहस्रदलकमलकर्णिकामध्यस्थायैश्रीगुरुपा

पूः
८
8

रुकायैअजपाजपानांसहस्त्रंसमर्पयामिनमः इत्यजपाज
पंसमर्प्याऽजपामंत्रेणप्राणायामंकृत्वा ओंअस्यश्रीअज
पागायत्रीमंत्रस्य हंसऋषि रव्यक्तगायत्रीछंदः परमा
त्मादेवता हंबीजं सःशक्तिः सोहंकीलकं उदात्तःस्व
रः नमःस्थानंहैमीवर्णाः ममभोक्षार्थेजपेविनियोगः ओं
हंसात्मनेऋषयेनमः शिरसि अव्यक्तगायत्रीछंदसेन

मः शुखे परमात्मदेवतायैनमः ह्रदये हंबीजाय

नमः मूलाधारे ॐऐंह्रींश्रींसः शक्तयेनमः पादयोः

ॐऐंह्रींश्रींसोहंकीलकायनमः नाभौ ॐकारतत्त्वा

यनमः ह्रदये ॐऐंह्रींश्रींउदात्तस्वरायनमः कंठे

ॐनमस्येस्थानायनमः मूर्ध्नि ॐऐंह्रींश्रींहैमवर्णाय

नमः सर्वांगेषु इतिविन्यस्यममभोक्षार्थेजपेविनि

प्र॰ योगः इतिकृतांजलिर्वदेत् ततः ॐ ऐं ह्रीं श्रीं ह्स्त्रां सूर्या

पू॰ त्मनेस्वाहा अंगुष्ठाभ्यांनमः ॐ ऐं ह्रीं श्रीं ह्स्त्रीं सोमात्मने

४ स्वाहा तर्जनीभ्यांस्वाहा ॐ ऐं ह्रीं श्रीं ह्स्त्रूं निरंजनात्मनेस्वा

१ हा मध्यमाभ्यांवौषट् ॐ ऐं ह्रीं श्रीं ह्स्त्रैं निराभासात्मने

अनामिकाभ्यांहुं ॐ ऐं ह्रीं श्रीं ह्स्त्रौं अनन्तँतत्वः सूक्ष्मादेवी

प्रबोदयात्स्वाहा कनिष्ठिकाभ्यांवौषट् ॐ ऐं ह्रीं श्रीं ह्स्त्रः

अव्यक्तबोधात्मनेस्वाहा करतलकरपृष्ठाभ्यांफट् इ
तिकरन्यासः अथषडंगन्यासः ॐऐंह्रींश्रींह्स्रांसूर्या
त्मनेस्वाहा हृदयायनमः ॐऐंह्रींश्रींह्स्रींसोमात्मने
स्वाहा शिरसेस्वाहा ॐऐंह्रींश्रींह्स्रूंनिरंजनात्मनेस्वा
हा शिखायैवषट् ॐऐंह्रींश्रींह्स्रैंनिराभासात्मनेस्वा
हा कवचायहुं ॐऐंह्रींश्रींह्स्रौंअनन्ततनुःसूक्ष्मादे

पू॰ वीप्रचोदयात्स्वाहा नेत्रत्रयायवौषट् ॐ ऐं ह्रीं श्रीं ह्स्त्रः श्रव
१॰ क्रबोधात्मने स्वाहा अस्त्रायफट् इति करयोर्विन्यस्य हृदा
दिषु पीतानेवमंत्रान्विन्यस्य ध्यानं कुर्यात् ॐ द्यौमूर्धानं
यस्यविप्रावदंति खंवैनाभिं चंद्रसूर्यौ च नेत्रे दिशिभिः श्रो
त्रंयस्यपादौ क्षितिंश्च ध्यातव्योसौ सर्वभूतांतरात्मा इति
विराट्स्वरूपं स्वात्मानं ध्यात्वा तदनु संयायी प्राणवायो

र्निर्गमप्रवेशात्मकमजपामंत्रं हंसः इतिपंचविंशा
तिवारंजप्त्वा समर्प्य गुरूपदिष्टमार्गेणनादानुसंधा
नपूर्वकनिरस्तसमस्तोपाधिना केनापिचिद्विलासे
नप्रवर्त्तमानोस्मीतिविभाव्य स्वकार्यानुष्ठानाय ओं
समुद्रमेखलेदेविपर्वतस्तनमंडले विष्णुपत्निनम
स्तुभ्यं पादस्पर्शंक्षमस्वमे इतिभूमिंप्रार्थ्य श्वासानुसा

पू॰ ११ रेणानस्यापादंनिधाय बहिर्गत्वामलमूत्रोत्सर्गाचमनंदंत
धावनादिकंविधाय नद्यादौगत्वा वैदिकंस्नानंनिर्वर्त्य तां
त्रिकमारभेत् तत्रादौ मूलंआत्मतत्वायस्वाहा मूलंवि
यातत्वायस्वाहा मूलंशिवतत्वायस्वाहा अथवा ॐह्रीं
स्वाहा इत्याचम्य मूलंस्मरन्मलापकर्षणस्नानंविधा
याचम्यसंकल्पंकुर्यात् ॐअद्यामुकमासस्यामुकपक्ष

प्रत्यंगिरा

स्यातिर्यावत्तुकायामुकगोत्रोमुकशर्माहं श्रीकुलदेवता

प्रीत्यर्थं तांत्रिकविधिना स्नानमहं करिष्ये इति संकल्प

कृत्वा जले त्रिकोणचक्रं विलिख्य सूर्यमंडलात् ॐ गंगे

च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि ज

लेस्मिन्सन्निधिं कुरु इति अंकुशमुद्रया तीर्थमावाह्य पुरः

कल्पिततीर्थं संयोज्य आचम्य स्वात्मानं प्रोक्ष्य मूलेन

पू· १२

12

मृत्तिकयाप्लवनं विधाय मूलं पठन् कुम्भमुद्रया वाहितां स्वदे
वतां त्रिरभिषिच्य श्रवणादि सप्तच्छिद्राणि निरुध्य त्रिरुन्म र्निम·
ज्योन्मज्जेत् इति स्नानविधिः अथ संध्या पूर्ववदाचम्य स्वमू
लप्राणायामऋष्यादिकरषडंगं विधाय पूर्ववत्तीर्थमावा
ह्य वामहस्ते जलं निधाय दक्षहस्तेनाच्छाद्य लं वं रं यं हं
इति त्रिरभिमंत्र्य मूलमंत्रमुच्चरन् तत्त्वमुद्रया मूर्ध्नि सप्तधा ॥

मूलेनचत्रिधाभ्युक्ष्याशोघंजलंदत्तहस्तेसमादाय तेजो

रूपंध्यात्वा इडयादेहांतःपापंप्रक्षाल्य कृष्णवर्णंतज्ज

लंपापरूपंपिंगलयाविरच्य पुरःकल्पितवज्रशिला

यांफडितिनिक्षिपेत् ततोर्घ्यंविधाय ॐह्रांह्रींह्रूंसः

श्रीमार्तंडभैरवायप्रकाशशक्तिसहितायइदमर्घ्यं

परिकल्पयामिस्वाहेति त्रिरर्घ्यंकुलसूर्यायदत्वा तत्र

प्र: विधिवद्ध्यात्वा ॐप्रत्यंगिरायैविद्महे शत्रुनिसूदिन्यैधीम
१३ हि तन्नोदेवीप्रचोदयात् ततःचतस्रषुसंध्यासुक्रमशो
13 मूलाधारहृत्कमलभ्रूमध्यब्रह्मरंध्रेभ्योदेवीतेजःसमा
कृष्य इडयादिरोच्यकल्पितवह्निसूर्यमंडलचंद्रतारा
मंडलेषुनिःक्षिप्य देवींध्यात्वा ततः अतिस्वस्वगायत्र्या
र्घ्यंदत्वा यथाशक्तिस्वस्वगायत्रींजप्त्वा स्वबीजाद्यक्षरंस

वंमूलंचजत्वा प्राणायामादिनाजपंसमर्प्य मंडले
भ्योदेवीतेजः स्वस्वस्थानेदेवीचहृदिर्मानीयध्याये

दिति ध्यानादि ततस्तर्पणम् एवंवदाचम्य प्राणा
यामादिकृत्वा तीर्थमावाह्य मूलेनजलेसंमथाम
तमुद्रयाम्रतीकृत्य तत्रजलेयंत्रंध्यात्वा तत्रदेवी
हृदयात्सपरिवारामानीय षडंगयोगेनसकली

पू. हृत्प कुंडलिन्याः प्रयोगेनामृतेनाभिषिच्य विधिवत्त्र पूज्य
१४ ऐशान्यां ऐं ह्रीं श्रीं श्रमुकानंदनाथभैरवस्तर्पयामिति त्रिः
14 संतर्प्य वह्नौ परमगुरुं नैऋत्यां परमाचार्यं वायव्ये परमे
ष्ठिगुरुं च त्रिः सकृद्वा संतर्प्य दिव्यसिद्धमानवौघानपि गु
रून्संतर्प्य जले यंत्रं विभाव्य मूलं भैरवसहिते प्रत्यंगिरे
तर्पयामिति त्रिः संतर्प्य परिवारानपि संतर्प्य प्राणा

यागादिविधाय देवीस्वरूपादिविसर्जेदितितीर्थं च विस
र्जेत् स्वस्थाने इति निर्पणम् ततो यागगेहमागत्य जला
दिना द्वारदेवताः पूजयेत् ॐ धां धात्रे नमः विं विधात्रे नमः
दक्षे गं गङ्गायै नमः यं यमुनायै नमः वामे द्वारश्रियै नमः
देहल्यै नमः ऊर्ध्वे वास्तुपुरुषाय नमः अधः इति संपूज्य
स्वासनमास्तीर्य ॐ ह्रीं आधारशक्तिकमलासनाय नमः

पू॰ १५

15

इति संपूज्य वीरासनेनोपविश्य ॐ पृथ्वि त्वया धृता लो
का देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चा
सनं इति पृथ्वीं प्रार्थ्य संविदं यथामंत्रेण स्वीकुर्यात् त
द्विधिर्यथा ॐ संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे
ब्राह्मणानां च तृप्त्यर्थं पवित्रा भव सर्वदा ॐ ब्रह्माण्ये
नमः स्वाहा सिद्धमूलक्रमये देवि हीनबोधप्रबोधिनि ।

जाप्रज्ञावशंकरिशत्रुपक्षनिसूदनि ऐंज्ञात्रियायैनमः
स्वाहा ॐ अज्ञानेंधनदीप्ताग्नौज्ञानाग्निब्रह्मरूपिणि आ
नंदस्वाहुतिंप्रीत्येसम्यग्ज्ञानंप्रयच्छमे ह्रींवैश्यपायैन
मःस्वाहा नमस्यामिनमस्यामियोगमार्गप्रदर्शिनि
त्रैलोक्यविजयेमातः समाधिफलदाभव क्लींशूद्रा
यैनमःस्वाहा इतिअभिमंत्र्य ओंअमृतेअमृतोद्भवे

अस्मतवर्षिणि अस्मतमाकर्षयाकर्षयसिद्धिंदेहि इत्यंगिराप
पु: दंमेवशमानयस्वाहेतितदुपरिसप्तयामूलंचजप्त्वा येनमुद्र
१८ 18 याऽस्मतीकृत्यावाहनादिमुद्राः संदर्श्य छोटिकाभिर्दिग्बंधनं
विधाय ॐ ऐं वदवदवाग्वादिनिममजिह्वाग्रेस्थिराभवसर्व
सत्त्ववशंकरिस्वाहा इत्यनेनमुखेजुहुयात् ततः आनंद
मयोभूत्वा अपसर्पंतुतेभूतायेभूताभुविसंस्थिताः येभू

ताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया पाषंडकारिणोभू
ताभूताभूम्यंतरिक्षगाः दिविलोकेस्थितायेचतेनश्यं
तुशिवाज्ञया इतितर्जनीमध्यमाभ्यांमूर्ध्वोर्ध्वंतालत्र
यदानेनवामपार्ष्णिघा तत्रयेनदिव्यदृष्ट्याच त्रिवि
धविघ्नानुत्सार्य छोटिकाभिर्दशदिग्बंधनंकृत्वा च
तुर्दिक्षुवह्निप्राकारंसंचिंत्यप्राणायामंकुर्यात् तत्रप्र

एवंषोडशवारमुच्चरन्दक्षांगुष्ठेनदक्षनासापुटंनिरुध्य वामे
पू: नपवनंपूरयेत् ततस्तमेवचतुःषष्टिवारमुच्चरन् दक्षा
१७ नामाकनिष्ठाभ्यांवामंपुटंचनिरुध्यदक्षेणपवनंरेचयेदि
17 त्येकः प्राणायामः एवमेवविपर्ययेनद्वितीयःप्रथमव
त्तृतीयः इत्थंप्राणायामेननिरस्तसकलकल्मषंस्वदेहंदे
वताराधनयोग्यंविभाव्य भूतशुद्धिंकुर्यात् अथमूलाधा

राहंसइतिमंत्रेणकुंडलिनींपृथिव्यासहस्वाधिष्ठाने आ
नीयतत्रजलेपृथ्वींलीनांविभाव्य तस्माज्जलेनसहम
णिपूरेसमानीय तत्रवह्नौजलंलीनंविचिंत्य तस्माद्व
ह्निनासहाऽनाहतेसमानीय तत्रावायौवह्निंलीनंविभा
व्य तस्माद्वायुनासहविशुद्धेसमानीय तत्रस्याकाशेवा
युंलीनंविचिंत्य तस्मादाकाशेनसहआज्ञाचक्रेसमानी

य तत्रस्थमनस्याकाशंलीनं संचिंत्य मनोनादेलीनंविभाव्य
प्र. ध्वनौध्वनिंसमर्प्य सहस्रदलकमलकर्णिकांतस्थचंद्रमंड
पू. लमध्यगत त्रिकोणांतर्गततेजोमयबिंदुरूपपरमशिवेन
१८ 18 तांसमर्प्य प्राणायामविधिनायमितिवायुबीजंधूम्रवर्णं
षोडशधाजपन् शरीरेपापपुरुषंवामकुक्षिस्थितंपाप
पुरुषंकज्जलप्रभं ब्रह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्

यं सुरापानस्यदायुक्तं गुरुतल्पकटिद्वयं तत्संसर्गिपदद्वंद्व
मंगप्रत्यंगपातकं उपपातकरोमाणां रक्तश्मश्रुविलोचनं
खड्गचर्मधरं कृष्णं पापं विचिंत्य तं संशोष्य रमिति वह्निबीजं
रक्तवर्णं चतुःषष्टिवारं जपं तमेव संदह्य वमिति सुधा
बीजं शुक्लवर्णं सहस्रारे विचिंत्य द्वात्रिंशद्वारं जपं तदुद्भ
वामृतवृष्ट्या निष्पापं शरीरमुत्पाद्य ललाटस्थलमिति ह

पापं ऊं ह्रौं विचिंतये ।
इति काम ऊं ह्रौं ँ

प्र॰ पृथ्वीबीजेनपीतवर्णंषोडशाधारजन्मेनसहृदृढीकृत्य ह्रीमितिषो
पू॰ डशाधारजन्मेनमूलस्थेनसाकाशशक्तिबीजेनसैश्वर्यंदेहंवि
१९ धाय सोहमितिमंत्रेणकुंडलिनीममृतलोलीभूतांपंचभू
19 तानिजीवात्मानंचब्रह्मपथेनस्वस्वस्थानेनियोजयेत् ततो
देवीरूपमात्मानंविचिंत्य हृदिहस्तंनिधाय प्राणप्रतिष्ठां
कुर्यात् ओंआंह्रींक्रोंयंरंलंवंशंषंसंहंहौंहंसःसोहंश्रीप्रत्यं

गिरायाः प्राणा इह प्राणा १२ जीव इह स्थितः १२ सर्वेंद्रि

याणि इह स्थितानि १२ वाङ्मनस्त्वक्चक्षुः श्रोत्रघ्राणप्रा

णा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां

विधाय स्वमूलऋष्यादिस्मरणं विदधीनयथा ओंअस्य

श्रीप्रत्यंगिरामहामंत्रस्य भैरवऋषिः अनुष्टुछंदः

श्रीप्रत्यंगिरादेवता ह्रींबीजं श्रींशक्तिः स्वाहाकील

ममसर्वदेहानुचिन्तासार्थे सर्वकामनासिद्ध्यर्थे

म॰ ॐ श्रीमहाविद्यासिद्ध्यर्थे जपे विनियोगः इति कृतांजलिः स्मृ
पू॰ त्वा यथाविधिर्न्यसेत् ॐ भैरवऋषये नमः शिरसि अनु
२॰ ष्टुब्छंदसे नमः मुखे श्रीमत्प्रत्यंगिरादेवतायै नमः हृदि
20 ह्रींबीजाय नमः गुह्ये श्रीं शक्तये नमः नाभौ स्वाहाकील
कायनमः पादयोः मम श्रीधर्मार्थकाममोक्षार्थे जपे वि
नियोगः सर्वांगेषु इति ऋष्यादिस्मरणं ॐ ऐं नमः नाभ्या

ह्रिपादांतं ह्लींनमः कंठादिनाभ्यंतं श्रींनमः मूर्धादिकं

ठांतं ऐंनमः वामपाणितले ह्लींनमः दक्षे श्रींनमः उभ

योः अथस्वमूलकरन्यासः ॐऐंअंगुष्ठाभ्यांनमः ह्लींत

र्जनीभ्यांनमः श्रींमध्यमाभ्यांनमः अत्पंगिरेअनामि

काभ्यांनमः ममरक्तरक्तकनिष्ठिकाभ्यांनमः ममश

त्रून्भक्तभक्तकरतलकरपृष्ठाभ्यांनमः अथषडंगन्या

पृ०
२१
21

सः ॐ ऐं हृदयाय नमः ह्रीं शिरसे स्वाहा श्रीं शिखायै वषट्
प्रत्यंगिरे कवचाय हुं मम रक्तरक्त नेत्रत्रयायै वौषट् मम
शत्रून्भक्ष भक्ष अस्त्राय फट् इति षडंगन्यासः अथ मातृका
न्यासः ॐ अस्य श्रीअंतर्मातृकान्यासस्य ब्रह्मा ऋषिः
गायत्री छंदः श्रीमातृका सरस्वती देवता हलो बीजा
नि स्वराः शक्तयः अव्यक्तं कीलकं मम श्रीप्रत्यंगिरे प्रीत्यर्थे

न्यासेविनियोगः इतिप्रांजलिःस्मृत्वान्यसेत् ब्रह्माऋ
षयेनमः शिरसि गायत्रंछंदसेनमः मुखे श्रीअनमी
त्वकादेवतायैनमः हृदि हल्लोबीजेभ्योनमो गुह्ये
स्वरेभ्यः शक्तिभ्योनमः पादयोः अव्यक्तकीलकायनमः
नाभौ ममश्रीप्रत्यंगिरांगत्वेनन्यासेविनियोगः इति
सर्वांगे अथमातृकान्यासः ॐऐंह्रींश्रींअंकंखंगंघंङं

पू: आं अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं श्रीं इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः
२२ ॐ ऐं ह्रीं श्रीं उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः ॐ ऐं ह्रीं श्रीं एं तं
22 थं दं धं नं ऐं अनामिकाभ्यां नमः ॐ ऐं ह्रीं श्रीं ओं पं फं बं भं मं
औं कनिष्ठिकाभ्यां नमः ॐ ऐं ह्रीं श्रीं अं यं रं लं वं शं षं सं हं ळं:
अः करतलकरपृष्ठाभ्यां नमः इति करन्यासः अथ षडं
गन्यासः ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आः हृदयाय नमः ॐ

ऐंह्रींश्रींइंचंछंजंझंञंईंशिरसेस्वाहा ओंऐंह्रींश्रींउंटंठंडंढं

णंऊंशिखायैवषट् ओंऐंह्रींश्रींएंतंथंदंधंनंऐंकवचा

यहुं ओंऐंह्रींश्रींओंपंफंबंभंमंऔंनेत्रत्रयायवौषट्

ओंऐंह्रींश्रींअंयंरंलंवंशंषंसंहंळंक्षंअःअस्त्रायफट् इ

तिकरयोरङ्गुष्ठादितलान्तंविन्यस्यहृदादिषडङ्गेष्वपि

विन्यसेत् ततोनमोमातृकान्यासः अंनमः आंनमः इंन

श्र·
सू·
२३
23

मः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः ॡं
नमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अःनमः
कंठेषोडशादले कंनमः खंनमः गंनमः घंनमः ङंन
मः चंनमः छंनमः जंनमः झंनमः ञंनमः टंनमः
ठंनमः अनाहतेद्वादशादले डंनमः ढंनमः णंनमः
तंनमः थंनमः दंनमः धंनमः नंनमः पंनमः फं

नमः नाभौदशदले बंनमः भंनमः मंनमः यंनमः
रंनमः लंनमः लिंगमूलेषड्दले वंनमः शंनमः षं
नमः संनमः मूलाधारेचतुर्दले हंनमः त्रंनमः भूम
ध्येद्विदले क्षंनमः अंतर्मातृकान्यासः अथबहिर्मातृकान्या
सः ततः ऋष्यादिकमंतर्मातृकान्यासंवत् ॐऐंह्रींश्रींअं
नमः शिरसि ॐऐंह्रींश्रींआंनमःमुखवृत्ते ॐऐंह्रींश्रीं

पु॰ इंनमः दक्षनेत्रे ॐऐंह्रींश्रींईंनमः वामे ॐऐंह्रींश्रींउंनमः दक्ष
पू॰ कर्णे ॐऐंह्रींश्रींऊंनमः वामे ॐऐंह्रींश्रींऋंनमः दक्षनासि ॐ
२४ ऐंह्रींश्रींॠंनमः वामे ॐऐंह्रींश्रींऌंनमः दक्षगंडे ॐऐंह्रींश्री
24 ॡंनमः वामे ॐऐंह्रींश्रींएंनमः ऊर्ध्वोष्ठे ॐऐंह्रींश्रींऐंनमः
अधरे ॐऐंह्रींश्रींओंनमः ऊर्ध्वदंतेषु ॐऐंह्रींश्रींऔंन
मः अधोदंतेषु ॐऐंह्रींश्रींअंनमः मूर्ध्नि ॥

ॐऐंह्रींश्रींअः नमः आस्ये ॐऐंह्रींश्रींकंखंगंघंङं दक्षबाहु
संध्यग्रेषु ॐऐंह्रींश्रींचंछंजंझंञं नमः वामबाहुसंध्यग्रे
षु ॐऐंह्रींश्रींटंठंडंढंणं नमः दक्षपादसंध्यग्रेषु ॐऐं
ह्रींश्रींतंथंदंधंनं नमः वामपादसंध्यग्रेषु ॐऐंह्रींश्रीं
पं नमः दक्षपार्श्वे ॐऐंह्रींश्रींफं नमः वामे ॐऐंह्रींश्रींबं
नमः पृष्ठे ॐऐंह्रींश्रींभं नमः नाभौ ॐऐंह्रींश्रींमं नमः

मू: उदरे ॐ ऐं ह्रीं श्रीं यं त्वगात्मने नमः हृदि ॐ ऐं ह्रीं श्रीं रं असृगा
२५ त्मने नमः दक्षांसे ॐ ऐं ह्रीं श्रीं लं मांसात्मने नमः ककुदि ॐ
25 ऐं ह्रीं श्रीं वं वामेदसात्मने नमः वामांसे ॐ ऐं ह्रीं श्रीं शं अस्थ्या
त्मने नमः हृदादि दक्षकरांतं ॐ ऐं ह्रीं श्रीं षं मज्जात्मने नमः
हृदादि वामकरांतं ॐ ऐं ह्रीं श्रीं सं शुक्रात्मने नमः हृदादि
दक्षपादांतं ॐ ऐं ह्रीं श्रीं हं प्राणात्मने नमः हृदादि वामपा

दांतं ॐ ऐं ह्रीं श्रीं लं जीवात्मने नमः पादादिहृदंतं ॐ ऐं

ह्रीं श्रीं हंसं परमात्मने नमः हृदादिमूर्धांतं इतिविन्यस्य

ॐ पंचाशद्वर्णरूपां चकपर्देशादिभूषणां शुद्धस्फटि

कसंकाशां शुद्धज्योतिर्मयविराजितां मुक्तारत्नस्फुरद्भूषां ज

पमालां कमंडलुं पुस्तकं वरदानं च बिभ्रतीं परमेश्वरी

म् एवं ध्यात्वा मातृकाविद्यान्यासं कुर्याद्यथा ऐं नमः

श्री॰
पू॰
२८

26

मणिबंधे ह्रींनमः तले श्रींनमः अग्रे इतिदक्षकरे एवंवा
मकरे ऐंनमः दक्षे ह्रींनमः कूर्परे श्रींनमः पाणौ एवं
वामेपि ऐंनमः पादकक्षे ह्रींनमः जानुनि श्रींनमः पा
दाग्रे एवंवामेपि ऐंनमः लिंगे ह्रींनमः हृदि श्रींनमः
नादांते इतिविद्यान्यासः अथनवयोनिन्यासः ऐंनमः
दक्षकर्णे ह्रींनमः वामे श्रींनमः चिबुके ऐंनमः दक्ष

शंखे ह्रींनमः वामशंखे श्रींनमः मुखे ऐंनमः दक्षने
त्रे ह्रींनमः वामनेत्रे श्रींनमः नासायां ऐंनमः दक्षबा
हौ ह्रींनमः वामबाहौ श्रींनमः हृदि ऐंनमः दक्षकू
र्परे ह्रींनमः वामकूर्परे श्रींनमः ऊर्द्धौ ऐंनमः दक्ष
जानुनि ह्रींनमः वामे श्रींनमः नाभौ ऐंनमः दक्षपा
दे ह्रींनमः वामे श्रींनमः गुह्ये ऐंनमः दक्षपार्श्वे ह्रीं

पु॰ नमः वामे ख्रींनमः हृदि ऐंनमः दक्षहस्ते ह्रींनमः वा
पू॰ मे ख्रींनमः हृदि ऐंनमः दक्षजानुनि ह्रींनमः वामे
२७ ख्रींनमः कंठे इतिनवयोनिन्यासः ततःपुनरपिषडंग
27 न्यासः संपूचयने ऐंहृदयायनमः ह्रींशिरसेस्वा
हा ख्रींशिखायैवषट् प्रत्यंगिरेकवचायहुं
ममरक्षरक्षनेत्रत्रयायवौषट् ॥ मम

शत्रून्भक्षभक्षॐस्वाहाह्रास्त्रायफट् इतिन्यासः ह्रं
सःहंसः ॐमूलाधारेमूलविद्यांविद्युत्कोटिसमप्र
भां सूर्यकोटिप्रतीकाशां चंद्रकोटिप्रभांप्रिये वि
सतंतुस्वरूपांतां बिंदुत्रिवलयांप्रिये ऊर्ध्वशक्तिनि
पातेन सहजेनवरानने मूलशक्तिदृढत्वेन मध्यश
क्तिप्रबोधकः परमानंदसंदोह मानंदंचिंतयेत्य

पू॰ रं इत्यंतर्यजनं कृत्वा पीठपूजा मपि स्वदेहे कुर्यात्
पू॰ मूलाधारे ॐ आधारशक्त्ये नमः मूल प्रकृत्यै
२८ नमः कमठाय नमः शेषाय नमः पृथिव्यै नमः सु
18 धांबुधये नमः मणिद्वीपाय नमः चिंतामणि गृहा
यनमः रत्नवेदिकायै नमः मणिपीठाय नमः दिव्य
नानामणिगणेभ्यो नमः नानादेवेभ्यो नमः ॥

र्मायनमः दक्षांसे ज्ञानायनमः वामांसे वैराग्या

यनमः वामोरौ ऐश्वर्यायनमः दक्षोरौ अधर्मायन

मः दक्षऊक्षौ अज्ञानायनमः दक्षपृष्ठे अवैराग्या

यनमः वामपृष्ठे अनैश्वर्यायनमः वामऊक्षौ पुन

र्हृदि शेषायनमः पद्मायनमः प्रकृतिमयपत्रेभ्योन

मः विकृतिमयकेसरेभ्योनमः पंचाशद्बीजभूषितक

पु. णिकायैनमः सूर्यमंडलायनमः सोममंडलायन
पू. मः वैश्वानरमंडलायनमः संसत्वायनमः रंर
२९ जसेनमः तंतमसेनमः आंआत्मनेनमः अंअंतरा
29 त्मनेनमः पंपरमात्मनेनमः ह्रींज्ञानात्मनेनमः
दलेषु वामायैनमः ज्येष्ठायैनमः रौद्र्यैनमः अंबि
कायैनमः इच्छायैनमः ज्ञानायैनमः क्रिया।

येनमः ऊर्ध्विकायैनमः चिन्तायैनमः वियद्विद्रिका

येनमः ह्लन्यैनमः आनंदायैनमः मध्येमनोन्मन्यै

नमः ऐंपरायैनमः ऐंअपरायैनमः विद्रूपायैनमः

परापरायैनमः ह्सौंः सदाशिवमहाप्रेतासनायनमः

ब्रह्मविष्णुरुद्रेश्वरसदाशिवमहाप्रेतमहापद्मास

नायनमः परमशिवपर्यंकायनमः इतिपीठन्या

ह्रं ह्रिं श्रूं ह्लं फ्रं प्लूं हूं ह्लिं · । इत्तरिदया तो ~ २

प्र॰
मः तत्रैव हृदये स्वाभेदेन श्रीप्रत्यंगिरां ध्यायेत् ऊँऊ
प्र॰
र्ध्वकपालं डमरुं सा पिंगोर्ध्वकेशी सितभीमदंष्ट्रा भू
ऋ॰
याद्विभूत्यै मम भद्रकाली इति प्रत्यंगिरां ध्यात्वा मा
30
नसोपचारैराराध्य मनसा यथाशक्तिजपहोमादि
कं कृत्वा कामकलां विचिंत्य तदुपरि श्रीप्रत्यंगि
रां यथोक्तां ध्यायन् स्ववामभागे षट्कोणांतर्गत

त्रिकोणहृदयविंदुबाह्यवृत्तचतुरस्रंकृत्वा स्वदक्षेत्रिको
णंवह्निविंबमंडलंभूमौविरच्य ध्यात्वा तत्राधारशक्तिं
प्रपूज्य तत्राधारंनिक्षिप्य तदुपरिशङ्खमंत्रेणशोधि
तंशङ्खंमंत्रेणपूरितंपात्रं शंखादिकंवासंस्थाप्य तत्र गं
गेइत्यादितीर्थमावाह्य गंधादीन्प्रणवेननिक्षिप्य वह्नि
सूर्यसोमकलाभिःसंपूज्य धेनुमुद्रांप्रदर्श्य स्वमं

प्र· त्रेणचसंस्थये दितिविधिविहितसामान्यार्घ्योदकेनस्ववा
पू· मेकृतमंडलमभ्युक्ष्य तत्राधारशक्तिभ्योनम इत्या
३१ दिपीठपूजाक्रमेणसंपूज्य नम इत्याधारंप्रक्षा
31 ल्यमंडलोपरिसंस्थाप्य रंवह्निमंडलाय दशक
मलात्मनेनमः इतिप्रपूज्यफडितिकलशंप्रक्षाल्य
कारणेनप्रपूर्य रक्तवस्त्रमालादिनासंभूष्य

देवीत्रुह्मासंस्थाप्य अंअर्कमंडलायद्वादशाकलात्म
नेनमः इतिकलशंसंपूज्य सःचंद्रमंडलायषोड
शाकलात्मनेनमः इतिद्रव्यंसंपूज्य फडितिसंप्रो
क्ष्य हुमित्यवगुंठ्यमूलेनसंवीक्ष्यनमः इत्यभ्युक्ष्यमूलेन
गंधमाघ्राय ॐभैरवीपुष्पंदत्वा शापमोचनंकुर्यात् ॐएक
मेवपरंब्रह्म स्थूलसूक्ष्ममयंध्रुवं कचोद्भवांब्रह्महत्यां ते

सू॰ नतेनाशयाम्यहं सूर्यमंडलसंभूतेवरुणालयसंभ
३२ वे अमाबीजमयेदेविशुक्रशापाद्विमुच्यतां वेदानां
प्रणवोबीजं ब्रह्मानंदमयोयदि तेनसत्येनतेदेवि
32 ब्रह्महत्याव्यपोहतु इतित्रिः ततः ओंवांवींवूंवैंवौंवः
ब्रह्मशापमोचितायैसुरादेव्यैनमः इतित्रिः ओंह्रीं
श्रींवींक्रांक्रींक्रूंक्रैंक्रौंक्रः सुरेब्रह्मशापंमोचयमोच

य अमरतं स्वावयस्वावयस्वाहा इति त्रिः ॐ ह्रं सः स्रवि
म्हस्रंतरिक्तसञ्जोनावेदिमदतिथिर्दुरोणसत्
न्मह्वरसद्ऋतसद्व्योमसदब्जागोजाऋतजाम्रद्रिजा
ऋतं इति त्रिः पठित्वा आनंदभैरवीचनत्रयं ध्यात्वा
ह्सरक्तमलैयऊं आनंदभैरवायवौषट् सहरक्तमलैय
ऊं सुरादेव्यैवौषट् इति देवदेव्योस्त्रिः संपूज्य द्रव्यमध्येदत्ति

पू. णावर्तेनत्रिपंक्त्या अंनमः आंनमः इंनमः ईंनमः उंन
३३ मः ऊंनमः ऋंनमः ॠंनमः ऌंनमः ॡंनमः एंनमः
33 ऐंनमः ओंनमः औंनमः अंनमः अःनमः कंनमः खंनमः
गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः झंनमः ञं
नमः टंनमः ठंनमः डंनमः ढंनमः णंनमः तंनमः थंनमः
दंनमः धंनमः नंनमः पंनमः फंनमः बंनमः भंनमः मंन

मः यंनमः रंनमः लंनमः वंनमः शंनमः षंनमः संन
मः इतिशक्तिचक्रंविलिख्य तन्मध्ये हंनमः क्षंनमः
तत्समावेश्य द्वयमध्येऽमृतंविचिंत्य येनमुद्रयामृती
कृत्येतिसुधाबीजंमूलमष्टधापठित्वा पठित्वात्म
श्रीचक्रयोर्मध्येत्रिकोणाहत्तचतुरस्रंविलिख्य चतुरस्रे
ॐ पूर्णगिरिपीठायनमः उड्डियानपीठायनमः का

पू: ३४

34

मरूपपीठायनमः जालंधरपीठायनमः इतिसंपूज्य
षट्कोणेषडंगंसंपूज्य त्रिखंडेनत्रिकोणाग्रेदत्ते हं
रंसंपूज्य मध्ये आधारशक्तिं संपूज्य त्रिकोणगर्भे यं
त्रिकां संस्थाप्य नमइतिसामान्यार्घ्यजलेनाभ्युक्ष्य
यंधूम्रार्चिषेनमः रंऊष्मायैनमः लंज्वालिन्यैनमः
वंज्वलिन्यैनमः शंविस्फुलिंगिन्यैनमः ॥ षं

ह्रप्रियेनमः सं स्वरूपायैनमः हं कपिलायैनमः लं
हव्यवाहायैनमः क्षं कव्यवाहायैनमः इति संपूज्य
मध्ये रं वह्निमंडलाय दशकलात्मने नमः इति संपू
ज्य षट्कोणे षडंगेच संपूज्य मध्ये मूलेन देवीं संपू
ज्य पात्रं फडिति प्रक्षाल्य यंत्रिकोपरि संस्थाप्य तत्र कं
भं तपिन्यैनमः खं बं तापिन्यैनमः गं फं धूम्रायैनमः

मू॰ चं पं मरीच्यैनमः ङं नं ज्वालिन्यैनमः चं यं रुच्यैनमः
३५ छं दं सुषुम्णायैनमः जं थं भोगदायैनमः झं तं वि
35 श्वायैनमः ञं णं बोधिन्यैनमः टं ढं धारिण्यैनमः
ठं डं क्षमायैनमः इति अर्कमंडलायद्वादश
कलात्मनेनमः इतिसंपूज्य त्रिकोणावर्तषट्को
णेपात्रंविलिख्य समस्तव्यस्तमंत्रेणसंपू ॥

ज्य वरुणबीजं विलोममात्रकां च पठन्नमृतेन त्रिको

णं जलेन प्रपूर्य तत्र मत्र गंधादि निक्षिप्य ॐ अं अमृता

यै नमः आं आनंदायै नमः इं पूषायै नमः ईं तुष्ट्यै न

मः उं पुष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशि

न्यै नमः लृं चंद्रिकायै नमः लॄं कांत्यै नमः एं ज्यो

त्स्नायै नमः ऐं श्रियायै नमः ओं प्रीत्यै नमः औं अं

पू
३८
36

गदायैनमः श्रं पूर्णायैनमः श्रंः पूर्णामृतायैनमः
इतिषोडशकलात्मने सोममंडलायनमः इतिसंपू
ज्य पूर्ववत्तं द्रव्ये घं विलिख्य त्रिकोणे त्रिरेखायां अं
आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं
छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं
शं षं सं हं क्षं इतिविग्विर्विलिख्य मूलखंडत्रयेणात्रि

कोणसंपूज्य षट्कोणेषडंगंच गंगेत्यादितीर्थमावा

ह्य आनंदभैरवभैरव्यौस्वमंत्रेणसंपूज्य पूर्वादितः

ग्लूंगगगनरत्नेभ्योनमः म्लूंमर्त्यरत्नेभ्योनमः ह्लूंपा

तालरत्नेभ्योनमः मध्ये न्लूंनागरत्नेभ्योनमः इ

तिसंपूज्य मांसादिसंशोध्य ङमित्यवगुंठ्यामृतीकृ

त्य तालत्रयेणदिशःसंबंध्य तदुपरिसत्रयामूलं

स्लूंस्वर्गरत्नेभ्योनमः

संपूज्य तत्र देवीमावाह्य तालत्रयेणादिग्बंधं विधायावगुं
प्र. ठ्यामृतीकृत्य योनिं प्रदर्श्य ह्सौंः नमः मूलेन तथाज
पू. ज्ञापात्रं देवीरूपं विभावयेदिति ततो देव्याज्ञामा
३७ दाय घटसमीपे गुरुपात्रं ततः शक्तिपात्रं भो
37 गपात्रं स्वपात्रं योगिनीपात्रं वीरपात्रं बलिपाद्या
चमनीयपात्राणि संस्थाप्य चर्वणीयुतकारणेन तत्वसु

इया श्रीपादात्समुद्धृत्य आनंदभैरवं तर्पयामि नमः
इति मंत्रेण त्रिः संतर्प्य ततः गुरुं श्रीमच्छ्रीअमुकानंद
नाथपादुकां तर्पयामि नमः इति त्रिः संतर्प्य एवं पर
मगुरुपरमाचार्यादीन्संतर्प्य श्रीपादामृतेन मूलदे
वीं सायुधां सवाहनां सपरिवारां तर्पयामि नमः ३
ति संतर्पयेदिति कलशपूजाविधिः चक्रपीठोपरि

प्र· पीठपूजां पूर्ववद्विधाय अथ श्रीप्रत्यंगिरां ध्यात्वा वा
पू· युबीजेन वामनासापुटेन देवीस्वहृदयात्कुसुमांजलि
३८ नानीय तत्रावाह्य ॐ देवेशि भक्तिसुलभे परिवारसमन्वि
38 ते यावत्त्वां पूजयिष्यामि तावद्देवि इहावह इति पठित्वा
मूलं श्रीभैरवसहिते श्रीप्रत्यंगिरे इहागच्छ आगच्छ इह
संतिष्ठ संतिष्ठ इह सन्निधेहि सन्निधेहि इह सन्निरुध्यस्व

सन्निरुद्धास्व मममसर्वोपचारसहितांपूजांगृहाणगृहाण इ
त्यावाहनादिमुद्राःप्रदर्श्य प्राणप्रतिष्ठांश्रीचक्रेलेलिहान
मुद्रयाविधाय दशदिग्बंधनंकृत्वावगुंठ्यसकलीकृत्यप
रमीकृत्यधेनुयोनीःप्रदर्श्य वराभयपुस्तकाऽक्षमालाक्षा
नांकुशपाशचापबाणकपालकमलादिमुद्राःप्रदर्श्य
श्रीपादाम्रतेनसायुधांसवाहनांसपरिवारांसावरणां

प्र॰ श्रीभैरवसहितांश्रीप्रत्यंगिरांतर्पयामीतित्रिःसंतर्प्य पु

पू॰ नरपिमूलेनश्रीप्रत्यंगिराश्रीपादुकांतर्पयामिनमः

३९ इतित्रिःसंतर्प्य मूलमुच्चार्यएतत्पाद्यंश्रीभैरवसहितप्र

39 त्यंगिरायैनमः पादयोःपाद्यम् एवमर्घ्यंस्वाहाशिरसि आच

मनीयंमधुपर्कंच स्वाहामुखेस्नानीयंनमः सर्वांगे इतिसंस्था

प्य शुद्धंमूलेनांगान्याछाद्यविचित्रपट्टवस्त्रकं ॥

मकस्तूरीचंदनसिंदूरमुकुटकुंडलहारनूपुरादिनाना
लंकारान्दत्वापुनराचमनीयंदद्यात् ततोमध्यानामां
गुष्ठाभ्यांगंधोनमः इतिगंधं अंगुष्ठतर्जनीभ्यांपुष्पाणिवौष
ट् इतिपुष्पैःसंपूज्य धूपपात्रेफडितिसंपूज्य पुनःस्थाप
यित्वावामतर्जन्यासंस्पृश्य श्रीपात्रास्त्रेनेनदीपंनिवेदया
मीतिनिवेद्य ऐं जगद्गुह्नि मंत्रमातःस्वाहेतिवंदासंपूज्य वा

